# श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

## आचार्यकक्षा-तृतीयसत्रम् , बाह्यछात्रेभ्यः स्वाध्यायकार्यम्

| | | |
|---|---|---|
| विषयः – स्वामिनारायणवेदान्तः (J) | प्रश्नपत्रम् – ३ | गुणाः - ३० |
| संदर्भग्रन्थः – वटपत्तनशास्त्रार्थः - ( हेतुटीकासमेतः ) - ३४ तः ३८ अध्यायाः | | |

---

विभागः - १

**प्रश्नः - १ अधोलिखितेषु श्लोकेषु कयोश्चित् द्वयोरेव यथाग्रन्थं व्याख्या कर्तव्या ।** (१०)

(१) "मुक्तानन्दो भगवता प्रेषितो वटपत्तनम् । स मुने ! वादिनो जित्वा वृत्तालयमुपागतः ॥"

(२) "तस्मात्तस्यैव सततं नामसंकीर्तनं द्विजाः । यूयं कुरुत तेनैव भुक्तिं मुक्तिं च यास्यथ ॥"

(३) "नामसंकीर्तनं विष्णोः कलिकल्मषनाशनम् । निःश्रेयसकरं नूनमित्यस्माभिर्विनिश्चितम् ॥"

विभागः २

**प्रश्नः - २ पञ्च प्रश्नानां टिप्पणी लेख्या ।** (१०)

(१) मुक्तानन्दमुने: वटपत्तनशास्त्रार्थः कस्मिन् प्रकरणे उपवर्णित: ?

(२) वटपत्तनशास्त्रार्थः कति अध्यायेषु निरूपितः ?

(३) पञ्चत्रिंशदध्याये कति श्लोकाः वर्तन्ते ?

(४) सद्यः संसृतिमोक्षः कस्मात् भवति ?

(५) "कलिसम्भवाः" इति पदस्य कोऽर्थः ?

(६) मुमुक्षुभिः केषां मार्ग: न सेव्यः ?

विभागः - ३

**प्रश्नः - ३ कस्यचिदेकस्य प्रश्नस्योत्तरं यथाग्रन्थं दातव्यम् ।** (०५)

(१) पञ्चत्रिंशदध्यायानुसारं कलियुगेऽपि भगवतः अवतारा: भवन्ति इति संसाधयत ।

(२) षट्त्रिंशदध्यायानुगुणं त्रियुगशब्दस्य विशेषार्थं विवेचयत ।

विभागः - ४

**प्रश्नः - ४ अष्टत्रिंशदध्यायोक्तदिशा वादिभिः कृतभगवदाश्रयप्रसङ्गं संक्षेपेण उपवर्णयत । (०५)**

*******